अथनामकरणप्रयोगः॥अस्यकुमारस्यआयुरभिवृद्धिव्यवहारसिद्धिबीजगर्भ
समुद्भवैनोनिबर्हणद्वाराश्री०र्थंनामकर्मकरिष्यइतिसंकल्प्य॥गणेशपूजनं
स्वस्तिवाचनादिकुर्यात्॥केवलनामचिकीर्षायांस्वस्तिवाचनमुपक्रम्यपु
ण्याहवाचनत्रयमुक्त्वा॥अमुकनाम्नेस्मैस्वस्तिंभवंतोब्रुवंत्वितिनिर्वदेत्॥
ब्राह्मणाश्चैतंनाम्नेस्मैस्वस्तीतिब्रूयुः॥ततश्चपुण्याहवाचनशेषंसमापयेत्॥
जातकर्मसहितनामचिकीर्षायामस्यकुमारस्यजातकर्मनामकर्मणोःपुण्या-
हंभवंतोब्रुवंत्वितिस्वकालेनिःप्रयुक्ते॥अस्यकुमारस्यजातकर्मणे एतंनाम्ने
स्मैस्वस्तिंभवंतोब्रुवंत्वितिनिर्वदेत्॥तदनुसारिप्रतिवचनेब्राह्मणैर्दत्ते॥
अस्यकुमारस्यजातकर्मनामकर्मणोः ऋद्धिंभवंतोब्रुवंत्वितिवदे०॥ऋ
ध्यतामितिब्राह्मणाप्रतिब्रूयुः॥पुण्याहशेषंसमाप्य॥नांदीश्राद्धांतंकृत्वा॥
आचारप्राप्तंनामदेवतापूजनंकुर्यादित्यर्थः॥तंडुलपूर्णकांस्यपात्रेसुवर्ण
शलाकया॥श्रीगणेशायनमइतिलिखित्वा॥कुलदेवतानामलिखेत्॥

रा।म

१

श्रीनृसिंहभक्त इत्यादि॥ ततो मासनाम कृष्ण इत्यादि॥ ततो नाक्षत्रनाम कृ
त्तिका इत्यादि॥ ततो व्यावहारिकं नाम शिवशर्मेति॥ ततो नामदेवता
भ्यो नम इति तेषु चतुर्षु नामदेवता आवाहयेत्॥ ततस्तं शिशुमावरूणाग्र
हावैप्रतिष्ठाप्य॥ नाममंत्रैर्षोडशोपचारैः संपूज्य॥ तस्य दक्षिणकर्णे
उपदिशेत्॥ तदित्थं॥ इदमार्यः कुमारस्य नामास्य विदधाम्यहं शितिश्रा
धिति ब्राह्मणैरनुज्ञातः॥ श्रीगणपतये नम इति॥ कुलदेवतानाम नृसिंहभ
क्तोसि॥ मासनाम कृष्णोसि॥ नक्षत्रेण नाम्ना कृत्तिकोसीत्युपांशु वदेत्॥
ततो व्यावहारिकेण नाम्ना शिवशर्मासीति॥ ततस्तं शिशुमावरूणाग्रहावैप्र
तिष्ठे कृत्वा॥ सुप्रतिष्ठितं नामास्त्विति ब्राह्मणाः प्रवदेयुः॥ ततः कर्ता तिष्ठन्
कुलदेवताप्रमुखनाम्ना श्रीनृसिंहभक्तोयं भवतः सर्वान् ब्राह्मणान् अभि
वादयइति वदेत् नमस्कुर्यात्॥ तेच आयुष्मान्भवतु॥ एवं कुलदेवताप्र

१

युक्तनाम्ना नृसिंहभक्त इति वदेयुः॥ एवं कर्ता मासप्रयुक्तनाम्ना कृष्णोयंभ
वतः सर्वा॰ दयते॥ ते च आयुष्मा॰ एवं मासप्रयुक्तनाम्ना कृष्ण इति वदेयुः।
कर्तोपांशु वदेत्॥ नाक्षत्रप्रयुक्तनाम्ना कृत्तिकोयं भवतः सर्वा॰ अभि
वादयेइत्युक्ते ते च आयुष्मान्भवतु॥ भनुक्तप्रयुक्तनामेति वदेयुः॥
कर्ता व्यावहारिकप्रयुक्तनाम्ना श्रीवरामोयं भवतः सर्वा॰ दयते॥ ते च
आयुष्मान्भवतु। एवं व्यावहारिकप्रयुक्तनाम्ना श्रीवराम इति वदेयुः॥ तद
क्षभिआवरणां॰ गृहाजैप्रति॰ नाम चतुष्टयस्य सुप्रतिष्ठितमस्तु॥ ततः
कृतस्य नामकर्मणः संपूर्णता सिद्ध्यर्थं दशावरान् ब्राह्मणान्भोजयिष्य
इति संकल्प्य॥ भूयसीदानं च संकल्प्येश्वरार्पणं कुर्यात्॥ प्रयोगकाले
पि अभिवादनीयनाम उपांशुत्वमाह शौनकः॥ इति पुंसां नामकर्मप्रयोगः॥
॥ ७ ॥ अथ स्त्रीणां॥ संकल्पे स्याः कुमार्या इति विशेषः॥ स्वस्तिवा

२। मा चनेएतंरामध्ये अस्येस्वस्तिभवंतोब्रुवंत्विति॥ स्वस्तिवाचनांतेनामा
निलिखेत्॥ भक्तेस्थापनंकुलदेवतानाम॥ मासनामचरुक्मिणीके
२ कुंडीवासुदेवीतितिभिजीवंतालि॥ ॥स्त्रिपवेरभुवनाम्नास
हास्तिवेनालिखितं॥ ॥

२